॥ वाल्मीकि रामायण॥

३ अरण्यकाण्ड

अध्याय २४

अवष्टब्धधनुं रामं क्रुद्धं च रिपुघातिनम् ।
ददर्शाश्रममागम्य खरः सह पुरःसरैः ॥ १॥

तं दृष्ट्वा सगुणं चापमुद्यम्य खरनिःस्वनम् ।
रामस्याभिमुखं सूतं चोद्यताम् इत्यचोदयत् ॥ २॥

स खरस्याज्ञया सूतस्तुरगान्समचोदयत् ।
यत्र रामो महाबाहुरेको धुन्वन्धनुः स्थितः ॥ ३॥

तं तु निष्पतितं दृष्ट्वा सर्वे ते रजनीचराः ।
नर्दमाना महानादं सचिवाः पर्यवारयन् ॥ ४॥

स तेषां यातुधानानां मध्ये रतो गतः खरः ।
बभूव मध्ये ताराणां लोहिताङ्ग इवोदितः ॥ ५॥

ततस्तं भीमधन्वानं क्रुद्धाः सर्वे निशाचराः ।
रामं नानाविधैः शस्त्रैरभ्यवर्षन्त दुर्जयम् ॥ ६॥

मुद्गरैरायसैः शूलैः प्रासैः खड्गैः परश्वधैः ।
राक्षसाः समरे रामं निजघ्नू रोषतत्पराः ॥ ७॥

ते बलाहकसङ्काशा महानादा महाबलाः ।
अभ्यधावन्त काकुत्स्थं रामं युद्धे जिघांसवः ॥ ८॥

ते रामे शरवर्षाणि व्यसृजन्नक्षसां गुणाः ।
शैलेन्द्रमिव धाराभिर्वर्षमाणा महाधनाः ॥ ९॥

स तैः परिवृतो घोरै राघवो रक्षसां गणैः ।
तिथिष्विव महादेवो वृतः पारिषदां गणैः ॥ १०॥

तानि मुक्तानि शस्त्राणि यातुधानैः स राघवः ।
प्रतिजग्राह विशिखैर्नद्योघानिव सागरः ॥ ११॥

स तैः प्रहरणैर्घोरैर्भिन्नगात्रो न विव्यथे ।
रामः प्रदीप्तैर्बहुभिर्वज्रैरिव महाचलः ॥ १२॥

स विद्धः क्षतजादिग्धः सर्वगात्रेषु राघवः ।
बभूव रामः सन्ध्याभ्रैर्दिवाकर इवावृतः ॥ १३॥

विषेदुर्देवगन्धर्वाः सिद्धाश्च परमर्षयः ।
एकं सहस्त्रैर्बहुभिस्तदा दृष्ट्वा समावृतम् ॥ १४॥

ततो रामः सुसङ्क्रुद्धो मण्डलीकृतकार्मुकः ।
ससर्ज निशितान्बाणाञ्शतशोऽथ सहस्रशः ॥ १५॥

दुरावारान्दुर्विषहान्कालपाशोपमान्रणे ।
मुमोच लीलया रामः कङ्कपत्रानजिह्मगान् ॥ १६॥

ते शराः शत्रुसैन्येषु मुक्ता रामेण लीलया ।
आददू रक्षसां प्राणान्पाशाः कालकृता इव ॥ १७॥

भित्त्वा राक्षसदेहांस्तांस्ते शरा रुधिराप्लुताः ।
अन्तरिक्षगता रेजुर्दीप्ताग्निसमतेजसः ॥ १८॥

असङ्ख्येयास्तु रामस्य सायकाश्चापमण्डलात् ।
विनिष्पेतुरतीवोग्रा रक्षः प्राणापहारिणः ॥ १९॥

तैर्धनूंषि ध्वजाग्राणि वर्माणि च शिरांसि च ।
बहून्सहस्ताभरणानूरून्करिकरोपमान् ॥ २०॥

ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ।
भीममार्तस्वरं चक्रुर्भिद्यमाना निशाचराः ॥ २१॥

तत्सैन्यं निशितैर्बाणैरर्दितं मर्मभेदिभिः ।
रामेण न सुखं लेभे शुष्कं वनमिवाग्निना ॥ २२॥

के चिद्भीमबलाः शूराः शूलान्खड्गान्परश्वधान् ।
चिक्षिपुः परमक्रुद्धा रामाय रजनीचराः ॥ २३॥

तानि बाणैर्महाबाहुः शस्त्राण्यावार्य राघवः ।
जहार समरे प्राणांश्चिच्छेद च शिरोधरान् ॥ २४॥

अवशिष्टाश्च ये तत्र विषण्णाश्च निशाचराः ।
खरमेवाभ्यधावन्त शरणार्थं शरार्दिताः ॥ २५॥

तान्सर्वान्पुनरादाय समाश्वास्य च दूषणः ।

अभ्यधावत काकुत्स्थं क्रुद्धो रुद्रमिवान्तकः ॥ २६ ॥

निवृत्तास्तु पुनः सर्वे दूषणाश्रयनिर्भयाः ।
राममेवाभ्यधावन्त सालतालशिलायुधाः ॥ २७ ॥

तद्बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम् ।
रामस्यास्य महाघोरं पुनस्तेषां च रक्षसाम् ॥ २८ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com